ग्रं. ४५ संस्कृत

शंकर स्तोत्र

संवाद.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशायनमः॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रंच त्रियायुधं। त्रि
पसंहारं एक बिल्वं शिवार्पणं १ त्रिशाखे बिल्वपत्रै अछिद्रैः को
शुभैः॥ तवपूजां करिष्यामि एक बिल्वं शिवार्पणं २ त्रैलोक्य दानपुण्य
न त्रयाणाम अग्नि पूजनं ध्यानं त्रिदेव देवानां एक बि॰ ३ अश्वत्थ कोटिसह
स्राणां दश कोटि शिवालयं कोटिकन्या महादानं एक॰ ४ शालग्रामेषु वि
प्राणां तटाकं दश कूपयोः मस्त कोटिसहस्राणां एक बि॰ ५ त्रिवेदाध्ययनं
पुण्यं वेदपारायणं त्रिभिः त्रिविक्रमस्य दानेन एक बिल्वं॰ ६ तुलसी बिल्व
निर्गुंडी जंबीरामलं तथा पंचबिल्वानि तिख्यातं एक बिल्वं॰ ७ दर्शनं
बिल्ववृक्षस्य स्पर्शनं पापनाशनं अघोरपापनिर्मुक्तं एक बिल्वं शिवा
र्पणं ८ इतिश्रीस्कंदपुराणे उमामहेश्वरसंवादे बिल्वस्तोत्रं संपूर्णं राम
श्रीसदाशिवार्पणमस्तु॥ जयसीताराम॥ (संहारं) नारायणपरांजपे-९०५

Joint project of Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

शंकर श्रीगणेशाय नमः ॐकारं बिंदुसंयुक्तं नित्यं ध्यायंति योगिनः ॥ कामं बिल्व
१ दं मोक्षदं चैव ॐकाराय नमो नमः ॥ १ नमंत्यृषयो देवा नमंत्यप्सरसां किंनर
(2) गणाः ॥ नरा नमंति देवेशं नकाराय नमो नमः २ महादेवं महात्मानं म
हाध्यानपरायणं ॥ महापापहरं देवं मकाराय नमो नमः ३ शिवं शांतं जग
न्नाथं लोकानुग्रहकारकं ॥ शिवमेकपरं देवं शिकाराय नमो नमः ४ वा
हनं वृषभो यस्य वासुकी कंठभूषणं ॥ वामे शक्तिधरं देवं वकाराय नमो
नमः ५ यत्र यत्र स्थितं देवं सर्वव्यापिनमीश्वरं यो गुरुस्सर्वदेवानां यका
राय नमो नमः ६ षडक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ शिवलोक
मवाप्नोति शिवेन सह मोदते ७ इति श्रीमच्छंकराचार्यविरचितं षडक्ष
स्तोत्र रस्तोत्रं संपूर्णं श्रीसांबसदाशिवार्पणमस्तु ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com